National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 64-67
© 2026 NJHSR
www.sanskritarticle.com

**एच वी अमरनाथ**
शोध विद्यार्थी,वेदविभागः,
कर्नाटक संस्कृतविश्वविद्यालयः,
चामराजपेटे,बेंगळूरु-कर्नाटक

**Correspondence:**
**एच वी अमरनाथ**
शोध विद्यार्थी,वेदविभागः,
कर्नाटक संस्कृतविश्वविद्यालयः,
चामराजपेटे,बेंगळूरु-कर्नाटक

# काण्वशतपथब्राह्मणे निरूपितस्य अग्न्याधेयस्य कालवैविध्यपरिशीलनम्

**एच वी अमरनाथ**

### १.१. अग्न्याधेयपरिचयः

ऐतरेयारण्यके **'स एष यज्ञः पञ्चविधोऽग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः[1]'** इति श्रौतयज्ञाः पञ्चधा विभक्ताः सन्दृश्यन्ते। तत्र आद्याश्चत्वारो हविर्यज्ञाः। तेषां हविर्यज्ञानां एवमेव सोमसंस्थानामपि प्रारम्भ आधानेनैव भवति ।

**'आ समन्तात् ध्रियते अग्निः, अग्नयो वा अनेन कर्मणा इत्याधानम्'** इति विग्रहं कर्तुं शक्यते। एवमेव **'जातपुत्रः कृष्णकेशोऽग्नीनादधीत'** इति निर्देश अग्न्याधानस्य सामाजिकं एवमेव व्यावहारिकं कालं प्रबोधयति । अस्य निर्देशस्य कृतदारसङ्ग्रहः कृष्णकेशयुक्तः पुत्रवान् त्रैवर्णिकोऽग्नीन् श्रौतसंज्ञकानादधीत इत्यर्थो गम्यते ।

### १.१.१ आधानत्रैविध्यम् -

आधानं त्रिविधं भवति। होमपूर्वकम्, इष्टिपूर्वकम्, सोमपूर्वकञ्चेति। यदा आधानानन्तरं सर्वकर्मभ्यः पूर्वं यद्यग्निहोत्रमारभ्यते त**द्धोमपूर्वकमाधान**[2] मिति। यदा आधानानन्तरं दर्शपूर्णमासौ वा प्रारभ्यते त**दिष्टिपूर्वमाधान**[3] मिति। एवमेव आधानानन्तरं सोमयाग एवारभ्यते त**त्सोमपूर्वकमाधान**[4]मिति । अत्र सर्वत्र तत्तत्कालसङ्कल्पादिविशेषान् ज्ञात्वाधानं कर्तव्यम् ।

### १.१.२. आधानकालः-

काण्वशतपथब्राह्मणे यद्यपि **"कृत्तिकास्वग्नी आदधीते**[5]"ति प्राथम्येन नक्षत्रकालविशेषा एव प्रतिपादिताः। तथापि ब्राह्मणे **"स योऽमावास्यायामग्नी आधत्ते**[6]" इति, कल्पेऽपि **'अमावास्यायामग्न्याधेयम्**[7]**'** इति च आधानस्य अमावास्यतिथिः विशेषेणोपदिष्टा दृश्यते। तत्र अमावास्यायामाधाने

**सर्वे देवा वसन्ति सर्वाणि भूतानि सर्वा देवताः सर्व ऋतवः सर्वे स्तोमाः सर्वाणि पृष्ठानि सर्वाणि च्छन्दाःसि सर्वेषु ह वा अस्य देवेषु सर्वेषु भूतेषु सर्वासु देवतासु सर्वेष्वृतुषु सर्वेषु स्तोमेषु सर्वेषु पृष्ठेषु सर्वेषु च्छन्दःस्वग्नी आहितौ भवतो योऽमावास्यायामाधत्ते तस्मादमावास्यायामेवाग्नी आदधीत याऽसौ वैशाखस्यामावास्या तस्यामादधीत सा रोहिण्या संपद्यत आत्मा वै प्रजा पशवो रोहिण्याऽऽत्मन्येवैतत्प्रजायां पशुषु प्रतितिष्ठत्यमावास्या अग्न्याधेयरूपं तस्मादमावास्यायामेवाग्नी आदधीत पौर्णमास्यामन्वारभेतामावास्यायां दीक्षेत**[8] ॥३॥ इति विशेषः प्रतिपादितः।

### तत्र सायणभाष्यमेवं वर्तते

"यथा लोके नगरस्य द्वारे उद्घाटितकपाटे सति, तेन द्वारेण पुरं प्रविशेत, प्रविश्य च स्वाभिलषितं देशं प्राप्नोति, तत्सदृशं अमावास्यायामाधानम्। यतो अमावास्यायाः संवत्सरात्मकयज्ञद्वारत्वात्, तत्रापि-धायकचन्द्रदर्शनेन विवृतत्त्वाच्च। अपि च आधानतः अमावास्यारूपद्वारेण यज्ञप्रवेशादेव स्वर्गफलं प्राप्नुयात्। अत्र स्वर्गलोकं नाम - लोक्यत इति लोकः। सुष्ठु अर्ज्यते शोभनेनार्जनेन गम्यत इति वा स्वर्गः। सर्वजनेनाभिलषणीयं दुखासम्भिन्नं कर्मफलमित्यर्थः। तथा चाहुः -

**यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।**
**अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम् ॥**

तस्मादेवं अमावास्याधानं प्रशस्तम्। तस्मादमावास्यायामेवाधा-तव्य"मिति।

तत्र द्वितीयं प्रयोजनं "यस्मिन्नहनि चन्द्रमाः पूर्वस्यां दिशि प्रतीच्यां वा दिशि न दृश्येत, तस्मिन्नहनि उपवासो नाम आधानसम्भारान् सम्भृत्य गार्हपत्यायतनसमीपे गार्हपत्यायतनसमीपे ब्रह्मचारिणा अवस्थानम्, चतुर्दशीप्रतिपन्मिश्रितायाममावास्यायामाधानं प्रारभे-तेत्यर्थः। उक्तगुणविशिष्टाया अमावास्यायाः कोऽतिशयः? इत्याह –

"यस्यां अमावास्यायां पुरस्तात्पश्चाच्च चन्द्रमा न सन्दृश्यते तस्यां एष चन्द्रो द्युलोकं विहाय इमं लोकमागत्य, तस्मिन् दिवसे इहैव वसति । एवं चन्द्रोपजीविनो देवाद्या इमं लोकमधिवसन्ति । एवमेव सर्वाणि भूतानि लोकान्तर्वर्तिनि प्राणिजातानि, सर्वा देवताः, वसन्ताद्याः सर्वे ऋतवः, त्रिवृदादयः स्तोमाः, बृहद्रथ-वैरूपादीनि पृष्ठानि, गायत्र्युष्णिगनुष्टुबादीनि छन्दांसि च अस्मिन् लोके चन्द्रमसमनुसृत्य इह लोके तेन सह वसन्ति । दिव्यस्यैव चन्द्रमसः सोमलतारूपेण भूमावस्थानात् सोमयागांगभूतास्त्रिवृदाद्याः सर्वेऽपि तमनुसृत्य इह वसन्तीति ।

सर्वेषु देवेषु, भूतेषु, देवतासु, ऋतुषु, स्तोमेषु, पृष्ठेषु, छन्दःसु, सत्सु अमावास्याधानकर्तुः अग्नी स्थापितौ भवतः । पूर्वोक्तेषु देवतादिगणेषु भूलेके सत्सु आधानं वैशिष्ट्यमाप्नोत्येव। तस्मादमावास्यायामग्नी आदधीत[9] ।

१.१.२.१ **वैशाखामावास्याधानवैशिष्ट्यम्** – विशेषतः "वैशाखस्या-मावास्या तस्यामादधीत[10]" इति विशाखानक्षत्रयुक्ता पौर्णमासी यस्मिन् मासि स वैशाखः, तत्सम्बन्धिनी या अमावास्या, तस्यामग्नी आदधीतेति प्रस्तुतम्। यतः सा वैशाखी अमावास्या रोहिणीनक्षत्रयुक्ता भवति। "**रोहत्यनया पश्वादिसमृद्धि**"मिति व्युत्पत्त्या रोहिण्याधानेन पुत्रपश्वादिसमृद्धो भवति। तस्माद्वैशाखस्या-मावास्यायामग्नी आदधीत। अत उक्तेन प्रकारेण अमावास्यायाः अग्न्याधेयरूपत्वं सुसम्पन्नमिति[11]" इत्येवं वैशिष्ट्यं प्रतिपादितम्।

**१.१.२.२. केवलनक्षत्राधानमतनिरसनम् –**

"**अथ यो नक्षत्र आधत्ते यथा पिहितायां द्वार्यद्वारा पुरं प्रपित्सेत्स जिह्मः पुरः स्यादेवं तद्यो नक्षत्र आधत्ते तस्मान्न नक्षत्र आदधीत**[12]" इति केवलनक्षत्राधानमतं निरस्तं ब्राह्मणे। तत्र भाष्ये -"यस्तु यजमानोऽमावास्यां विहाय केवले कृत्तिकादिनक्षत्रे अग्नी आधत्ते, स यथा नगरस्य द्वारि पिहितायां सत्यां, लौकिको जनो द्वारवर्जितेन प्रदेशेन मोहात् पुरं प्रवेष्टुमिच्छेत्, अद्वारा पुरं प्रविशेदितिवत्। पुरोभागे वक्रः प्रतिहतगतिर्भवतीत्यर्थः । आधानदिवसे चन्द्रदर्शनेन अमावास्यारूपस्य द्वारस्य पिहितत्वात् तस्य यज्ञप्रवेशो दुष्करो भवतीत्यर्थः । अतो यः केवले नक्षत्र आधत्ते, तस्य तन्नक्षत्राधानमेवमेव भवति । अतः "तस्मान्न नक्षत्र आदधीत[13]" इत्येवं केवलनक्षत्राधानमतं निरस्तं ब्राह्मणे।

**१.१.२.३ आधाने नक्षत्रविशेषाः -**

अग्न्याधानकर्मणः कालनिरूपणावसरे कृत्तिका-रोहिणी-मृगशिराः- पूर्वोत्तरफल्गुणी-हस्त-चित्रेति नक्षत्रसप्तकं प्रतिपादितम्। तत्र तत्तन्नक्षत्राधाने विशेषमेवं प्रतिपादितम् -

१. **कृत्तिकानक्षत्राधानम्** - तत्र प्राथम्येन '**कृत्तिकास्वग्नी आदधीत**[14]' इति कृत्तिकानक्षत्रवैशिष्ट्यं, कृत्तिकानक्षत्राधानवैशिष्ट्यं च विवृणोति। इदं नक्षत्रसमूहं अग्निदेवताकत्वादिदमग्निनक्षत्र[15]मिति, एवमेव षण्णां नक्षत्राणां अधिष्ठानयोगादस्य 'भूयिष्ठाः' **बहुतरा** इत्यपि नामान्तरं वर्तते।

तस्माद् भूयिष्ठनक्षत्राधानाद्यजमानोऽपि भूमान(बहुत्व) मुपगच्छतीति। एवमेव कृत्तिकाः प्राचीदिशः सकाशात् दक्षिणत उत्तरतो वा न च्यलन्ते। किन्तु प्राच्यामेव उद्यन्ति। अन्यानि नक्षत्राणि प्राचीदिग्भागाद्दक्षिणत उत्तरतो वा नियमेन परिवर्तन्ते । अत एव कृत्तिकासु आधाने अग्नेर्यजमानस्य च स्थिरत्वमुपपद्यते। '**कृत्तिकारोहिणीमृगशिरः फल्गुणीषु**[16]' इति कल्पे।

**२. कृत्तिकानक्षत्राधाननिषेधं-तन्निवृत्तिश्च –**

"**तदाहुर्न कृत्तिकास्वादधीत**[17]" इति कृत्तिकानक्षत्राधानं निषेधितम्। तत्र कारणमेवं प्रस्तुतं - "कृत्तिकाः ऋक्षाणां पत्न्य आसुः । ऋक्षं नक्षत्रं, तद्रूपेण अवस्थानात् । एवमेव ऋक्षशब्देन सप्तर्षयोऽभिधीयन्ते। "ता मिथुनेन व्यार्धयन्त" ताः कृत्तिका विगत ऋद्धिका अभवन् । यतोऽमी सप्तर्षयो दूरदेशे उत्तरदिग्भागे, कृत्तिकास्तु पूर्वस्यां दिशि उद्यन्ति। अत एव तासां विभिन्नदेशावस्थानेन पुरुषसम्भोगविरहान्मिथुनव्यृद्धिर-भवत् । तच्चासमीचीनम्। अतो नैवाहं मिथुनेन व्यृद्धो भवानीति अभिप्रेत्य, तासु नादधीतेति निषेधं प्रकटीचकार।

**तन्निवृत्तिस्तु** - कृत्तिकास्वपि अग्नी आदधीतैव, यतो अग्निरेव एतासां मिथुनं, अग्निनैव एता मिथुनेन समृद्धाः, अत एव नैष दोष इति दोषनिवृत्तिर्दर्शिता । अतः कृत्तिकासु अग्न्याधानं कर्तुं शक्यत एवेति ।

**३. रोहिणीनक्षत्राधानप्रशंसा –**

"**रोहिण्यामग्नी आदधीत**[18]" इति ब्राह्मणे रोहिणीनक्षत्राधानं प्रशंसितम्। तत्र सारस्तु 'प्रजाकामः प्रजापती रोहिण्यामाधानं कृतवान्। स तेन कारणेन सर्वाः प्रजाः सृष्टवान्। "ताः प्रजा एकरूपा उपस्तब्धास्तस्थुः" प्रतिबद्धगतयो विनाशरहिताः पुत्रपौत्रादिरूपेण एकरूपा अविच्छिन्नप्रवाहाः तस्थुः। ताश्च रोहिण्य इव स्वर्गादिलोकारोहणसाधनभूता इव स्थिता इति ।

एवमेव रोहिण्यामाधानतः मनुष्याणां कामः भोग्यवस्तुविषयः, तत्पूरणसामर्थ्यपशवो लभन्ते। अत एव "य एवं विद्वान् रोहिण्यामाधत्ते[19]" इति प्रशंसितं ब्राह्मणे ।

**४. मृगशिरोनक्षत्राधानप्रशंसा –**

'**मृगशिरस्यग्नी आदधीत**' इति ब्राह्मणे मृगशिरस्याधानं प्रशंसितम्। मृगशिराः प्रजापतेरेव शिरोरूपं नक्षत्रम्। एकदा प्रजापतिर्मृगरूपं धृत्वा मृगीभूतं स्वदुहितरमेवोपागमत् । तदा अकार्यकारिणः प्रजापतेः शिरश्छेत्तुं देवाः कश्चित् कोपिष्ठं पुरुषं सृष्टवन्तः। स इषुणा तस्य प्रजापतिरूपस्य मृगस्य शिरश्चिश्छेद। तच्च मृगशरीरं इषुच्छिन्न-शिरश्चेत्येतत् उभयमपि अन्तरिक्षमुत्प्लुत्य, नक्षत्रात्मनाऽवस्थितं सन्दृश्यते । स एव प्रजापतेः शिरो मृगशीर्षनक्षत्रमभवत्। "**श्रीर्वै शिरः श्रीर्हवै शिरः**[20]" इति शिरसः श्रियत्वं प्रतिपादितम् । शरीरे प्रथमार्धस्य शीर इति नाम, स भागः शरीरे श्रेष्ठो भवति । अत एव अस्मिन् नक्षत्राधाने श्रियं प्राप्नोतीति प्रयोजनमुपदिष्टम् ।

**५. मृगशिरोनक्षत्राधाननिषेधं-तन्निवृत्तिश्च –**

"**तदाहुर्न मृगशिरस्यादधीत**[21]" इति ब्राह्मणे मृगशिरोनक्षत्राधानं निषेधितम् । तत्र कारणं तु - मृगशरीररूपधृतस्य प्रजापतेर्देवा येन हेतुना पत्रदारुशल्यरूपावयवत्रयोपेन त्रिकाण्डेन इषुणा शिरश्चिच्छेद, तदा प्रजापतिरेतच्छरीरं त्यक्तवान् । अत एव नक्षत्रात्मना अवस्थितं शिरः शून्यस्थानं निर्वीर्यं च अभवत् । अत एव शरीरमपि यज्ञानर्हत्वं प्राप्तम् । न हि मृतशरीरस्य यज्ञात्मत्वं सम्भवति । अत एवास्मिन्नक्षत्रे आधानं न कर्तव्यमिति निषेधमुक्तम् ।

**तन्निवृत्तिः** - सामान्यमनुष्येन त्यक्तस्य शरीरस्य, शिरश्छेदनानन्तरं नक्षत्ररूपधरणं कर्तुं न शक्यते। "अयं प्रजापतिर्देवः, तेन परित्यक्तस्य तत्प्रभावात् शून्यरूपादिदोषो नास्ति। मृगरूपस्य तस्य शिरः स्वमहिम्नैव नक्षत्ररूपेण सम्पन्नम्। न खलु मानुषं शिरस्तथा भवितुमर्हति । अत एव अस्मिन्नाधाने न दोष" इति तन्निवृत्तिरपि तत्रैव प्रतिपादितम् ।

**६. फल्गुन्याख्ययोर्नक्षत्रयोराधानप्रशंसा –**

"**फल्ग्वोरादधीत[22]**" इति पूर्वोत्तरयोः फल्गुण्योराधानं प्रशंसितम्। अनयोर्नक्षत्रयोराधाने वैशिष्ट्यं तु- अनयोर्नक्षत्रयोः प्रत्येकस्य द्वित्वयोगाद्बहुत्वम् । इन्द्रदेवताकं नक्षत्रसमूहमेतत्। अत एव एताः "फल्गुण्य" इन्द्रस्य प्रतिनिधिभूता इति सम्भाव्यते। एतासामर्जुन्य इति गुह्यं नामापि वर्तते । अर्जुन इति इन्द्रस्य रहस्यं नाम। "अर्जुनः फल्गुणः पार्थः" इति कोशे। अत एव नक्षत्रसमूहोऽयं इन्द्रसम्बन्धी भवति ।

पूर्वोत्तरपल्गुणीनक्षत्राधष्ठानभूत इन्द्रो यज्ञस्य देवता। पूर्वयोराधाने सेन्द्रं अग्न्याधेयं भवति। तत्राधाने पुरस्तात्क्रतवः अग्निष्टोमादिरूपाः शीघ्रं सिध्यन्तीति। एवमेव उत्तरयोराधाने श्वःश्रेयसं भवतीति प्रयोजनं दर्शितं ब्राह्मणे।

**७. हस्तनक्षत्राधानप्रशंसा –**

"**हस्तेनाग्नी आदधीत[23]**" इति ब्राह्मणे । हस्तनक्षत्राधाने स्वाभीष्टं वस्तु दानरूपेण प्राप्तुं शक्यमिति प्रयोजनमुपदिष्टम् । कात्यायनोऽपि '**हस्तो लाभकामस्य[24]**', इत्यवोचत् । यः पुरुषः वस्तु इष्ट्वा "प्र मे दीयेत" इति हस्तनक्षत्रे आधानं करोति, स तद्दानं हस्तेन प्राप्नोतीति प्रयोजनं दर्शितं ब्राह्मणे ।

**८. चित्रानक्षत्राधानप्रशंसा -**

"**चित्रायामग्नी आदधीत**[25]" इति क्षत्रियाणां शत्रुनाशनसमर्थं चित्रायामाधानं आख्यायिकारूपेण प्रशंसितं ब्राह्मणे। तत्राख्यायिकासार एवं वर्तते - "एकदा देवा असुराश्च स्वर्गलोकं आरोढुमैच्छन्। तदासुरा रौहिणनामकं रोहणसाधनभूतमग्निमप्राप्नुवन्। एवमसुराणामारोहणसाधनं दृष्ट्वा देवा बिभयांचक्रुः। तदा इन्द्रो ब्राह्मणरूपं धृत्वा, एकामिष्टकां गृहीत्वासुराणां समीपं गत्वा 'अहमपि इमामिष्टकां भवदीयेऽग्नौ उपधानं करवाणी'ति अनुमतिं प्राप्य, तदिष्टकां तत्रास्थापयत्। अन्यदीये चयनेऽन्यदीयेष्टकोपधानम-शास्त्रीयमिति कारणादसुराणां अग्निर्विकिलो बभूव ।

कालान्तरे स एवेन्द्रः 'स्वेन स्थापितामिष्टकामादास्ये' इत्यनुज्ञां प्राप्य, इष्टकां ततोऽचालयत्। तदेष्टकायां चालितायां सत्यां सोऽग्निर्विशीर्णोऽभवत्। तदनन्तरं तेऽप्यसुरा शिथिला बभूवुः। तदेन्द्रस्तयेष्टकया वज्रं कृत्वासुराणां शिरश्चिच्छेद। सैवेष्टका चित्राख्या, तन्नक्षत्रमभवत् । अत एव यः क्षत्रियः, अन्यान् शत्रून् हन्तुमिच्छति तेनैव चित्रानक्षत्रे आधानं कार्यं, नान्यस्य[26] इति प्रयोजनं दर्शितं ब्राह्मणे । कात्यायनेनाऽपि '**चित्रा च क्षत्रियस्य**[27]' इति सूत्रितम् ।

९. **दिवैवाधानम्** - आधानं दिवैव कर्तव्यमिति दर्शितं ब्राह्मणे । तत्र कारणं तु- "पूर्वोक्तानि कृत्तिकादि नक्षत्राणि सूर्येणोपहृतवीर्याणि भवन्ति । यतः सूर्यरश्मिप्रकाशेनैव एतानि नक्षत्राणि प्रकाशन्ते ।

पुरा कृत्तिकादीनि क्षत्राणि अभूवन्। सूर्येण क्षत्रगुणमपहृतत्वात् "न विद्यते क्षत्र"मिति व्युत्पत्या नक्षत्राणि सम्पन्नानि। एवमेव कृत्तिकादिनक्षत्रमण्डलान्यपि सूर्यमण्डल इव तेजस्वीन्येव बभूवुः । एष सूर्य उदयं प्राप्नुवन् स्वतेजस्सामर्थ्यात् तेषां वीर्यं स्वीकृतवान्। तस्मात् "**आदानादेव आदित्य**" इति ख्यातोऽभवत्। यस्मादेवं कृत्तिकादीनि अपहृतवीर्याणि, तस्मादेव कारणात् कृत्तिकादिनक्षत्राणामाधारीभूते सूर्यात्मके तेजस्विनि नक्षत्रे दिवैव आधानं[28] कर्तव्यम्। न तु रात्रौ। कृत्तिकादीनां रात्रावपि उदयसम्भवादिति। इत्येवं नक्षत्राधानं प्रशंसितं ब्राह्मणे।

**१.१.२.४. आधाने ऋतुविशेषाः-**

ऋतुर्नाम मासद्वयात्मको कालविशेषः। "द्वौ द्वौ मार्गादिमासौ स्यादृतुः[29]" इति कोशेऽस्य स्वरूपं प्रतिपादितम्। स षड्विधः, वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरा इति । तेषु ऋतुषु वसन्तो ग्रीष्मो वर्षा देवसम्बद्धा ऋतवः । शरद्धेमन्तशिशिराः पितृसम्बद्धाः ऋतवः[30]। सूर्यो यस्मिन् काले दक्षिणगोलादुत्तरगोलं प्रति उदङ् पर्यावर्तते तदा मेरोरुपरिभागेऽवस्थितानां देवनां प्रकाशको भवति । एतदेवोत्तरायणं भवति।

यदा उत्तरगोलाद्दक्षिणगोलं प्रति पर्यावर्तते, तदा दक्षिणदिगवस्थितस्य पितृलोकस्य प्रकाशको भवति । एतदेव दक्षिणायनमित्युच्यते[31]। देवाः सर्वदा '**अनपहतपाप्मानः**' पापरहिता भवन्ति, मनुष्याणां पापमपहन्ति च। पितरस्तु पुरा मृता मर्त्या एव पितृरूपेण विराजन्ते इति कारणेन ते मनुष्यस्य पापापनोदने शक्ता न भवन्ति ।

"**तस्माद्यत्रैवोदङ्ङ्ग्यात्तर्ह्येवादधीत**" इति उदगयने देवसम्बद्धेषु ऋतुष्वेव अग्न्याधानं कर्तव्यम्। "**तस्मात्तर्हि नादधीत**" इति पितृसम्बद्धेषु ऋतुषु आधानं न कर्तव्यमिति तत्रैव प्रतिपादितम् ।

तत्रापि ब्राह्मणादि वर्णानुसारेण ऋतुविभागो दृश्यते । स च नित्यः काम्यश्चेति द्विविधः । वर्णानुसारेण नित्यकालस्तु- "तद्वै ब्रह्मैव वसन्तः क्षत्रं ग्रीष्मो विड्वर्षास्तस्माद्ब्राह्मणो वसन्त आदधीत ब्रह्म हि वसन्तः क्षत्रियो ग्रीष्मे क्षत्र: हि ग्रीष्मो वैश्यो वर्षासु भूमा हि विड् भूमाहि वर्षा[32]" इति (अर्थः स्पष्टः)।

'**यदि ह कामयेत क्षत्रस्य प्रतिमास्यां श्रिया यशसेति ग्रीष्म आदधीत**[35]'इति । कात्यायनोऽपि "**ग्रीष्मः क्षत्रियश्रीकामयोः**[36]"। क्षत्रकामस्य श्रीकामस्य च त्रैवर्णिकस्य ग्रीष्मर्तौ आधानं कार्यमिति ।

'**यदि ह पुष्टिकामः स्याद्वर्षास्वादधीत भूमा वै विट्**[37]" इति। कात्यायननाऽपि "**वर्षाः प्रजापशुकामवैश्यरथकृताम्**[38]" इति प्रजापशु-कामस्य पुष्टिकामस्य च त्रैवर्णिकस्य एवमेव रथकारस्य च वर्षर्तौ एव आधानं कार्यमिति कल्पे प्रतिपादितम् ।

**१.१.२.६. निर्दुष्टकालनिरूपणम्** - "**तद्वा आहुरपहतपाप्मानो वा ऋतव इत्यसौ वा एतेषामुद्यन्त्सर्वं पाप्मानमपहन्तीति तस्माद्यदैवैनं कदा चोपनमेदथादधीताथ यजेत न श्वः श्वमुपासीत न वै मनुष्यः श्वस्तनं वेद को हि तस्मै मनुष्यो यः श्वस्तनं विद्यात्**[39]" इति ब्राह्मणे ।

तत्सार एवं वर्तते- सर्वेऽपि ऋतवः पापरहिता भवन्ति । यतः पितृसम्बन्धिनां ऋतूणां पाप्मानं सूर्य अपोहतीति एषां पापराहित्यम्। अत एव सर्वेऽपि ऋतवः पापान् व्यपोहन्त्येव । अतो यदा मनसि 'आधानं कर्तव्य'मिति सङ्कल्प उदेति, तदाधानं कुर्यात् । ''न श्वः श्वमुपासीत'' श्वः करवाणि, श्वः करवाणि इति कालयापनं मा कुरु। यतो 'न मनुष्यः श्वस्तनं वेद' मनुष्यो भविष्यन्न जानाति, आयुषोऽस्थिरत्वादिति कारणेन शीघ्रातिशीघ्रमाधानं अग्न्याधानं अग्निहोत्रं, सोमयागादीन् कृत्वा सुसंस्कृता भवेयुरिति निर्दुष्टकालो निरूपितो ब्राह्मणे।

**पाद टिप्पणी:**

1 ऐत.आर. २-३-३
2 का.श्रौ.सू. ४-७-१
3 का.श्रौ.सू. ७-१-१
4 का.श्रौ.सू. ७-१-२
5 का.श.ब्रा. १-१-२-१
6 का.श.ब्रा. १३-१-१-१
7 का.श्रौ.सू. ४-१०-११
8 का.श.ब्रा. १३-१-१-१,२,३
9 मा.श.ब्रा.भा ११-१-१-१ तः ६
10 का.श.ब्रा. १३-१-१-३
11 मा.श.ब्रा.भा ११-१-१-७
12 का.श.ब्रा. १३-१-१-२
13 मा.श.ब्रा.भा ११-१-१-३
14 का.श.ब्रा. १-१-२-१
15 का.श.ब्रा. १-१-२-२
16 का.श्रौ.सू ४-७-२
17 का.श.ब्रा. १-१-२-२
18 का.श.ब्रा. १-१-२-३
19 का.श.ब्रा. १-१-२-४
20 का.श.ब्रा. १-१-२-५
21 का.श.ब्रा. १-१-२-६
22 का.श.ब्रा. १-१-२-७
23 का.श.ब्रा. १-१-२-८
24 का.श्रौ.सू.४-७-३
25 का.श.ब्रा. १-१-२-९
26 का.श.ब्रा. १-१-२-१०
27 का.श्रौ.सू.४-७-४
28 का.श.ब्रा. १-१-२-१२
29 अ.को.१-४-१३-१
30 का.श.ब्रा. १-१-३-१
31 का.श.ब्रा. १-१-३-३
32 का.श.ब्रा. १-१-३-४
33 का.श.ब्रा. १-१-३-५
34 का.श्रौ.सू.४-७-५
35 का.श.ब्रा. १-१-३-५
36 का.श्रौ.सू.४-७-६
37 का.श.ब्रा. १-१-३-५
38 का.श्रौ.सू.४-७-७
39 का.श.ब्रा. १-१-३-८